२होमार्थे कुण्डप्रतिनिधित्वेन बालुकादिभिः कर्त्तव्ये मण्डलभेदे च “नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत्। हस्तमात्रं तु तत् कुर्य्यात् बालुकाभिः समन्ततः” शा०ति०। “अथ वापि मृदा सुवर्णभासा करमात्रं चतुरङ्गुलोच्चमल्पे। हवने विदधीत वाङ्गुलोच्चं विबुधः स्थण्डिलमेववेदकोणम्” कुण्डोद्योतः। अथ वा कुण्डकरणाशक्तौ। तन्त्रान्तरे च “मृदा सुवर्णभासा वा शुद्धया बालुकयाऽपि वा। अङ्गुलोन्नतया वेदाङ्गुलोच्चं स्थण्डिलं विदुः। चतुःकोणसुदक्प्राचीप्रवणमल्पाकृतौ शुभम्। पञ्चाङ्गुलोच्चमथ वा रम्यं त्र्यङ्गुलमुन्नतम्। तस्मात् सम्यक् परीक्ष्यैव कर्त्तव्यं शुभवेदिकम्। हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि”। वशिष्ठः “कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत्” क्रियासारे। तत्करणप्रकारादि सं० त०द्रष्टव्यम्।

**स्थण्डिलशायिन्** पु० स्थण्डिले चत्वरे शेते व्रतवशात् शी–णिनि। व्रतार्थं चत्वरे शयितरि अमरः। “स्थण्डिलशायिनश्च” भट्टिः। [चत्वरे शयितरि शब्दर०।

**स्थण्डिलेशय** पु० स्थण्डिले शेते शीच अलुक्समा०। व्रतार्थं

**स्थपति** पु० स्था–क तस्य पतिः।१कञ्चुकिनि मेदि० २शिल्पिभेदे (छुतार) अमरः ३कुवेरे अजयः ४अधीशे ५वृहस्पतिसवनामकयागकर्त्तरि च अमरः।६सत्तमे त्रि०मेदि० तत्र अधीशपरत्वे “निषादस्थपतिर्गावेधुकेऽधिकृतः” कात्या० श्रौ० १।१।१२ “निषादस्थपतिर्गावेधुके चरावधिकृतः अधिकारी भवति”। एवं हि श्रूयते “यस्य रुद्रः प्रजाः शमयेत्स वास्तुमध्ये रौद्रं गावेधुकम् चरुं निर्वपेत्” इत्येतामिष्टिं प्रक्रम्य श्रुतम् “एतया निषादस्थपतिं याजयेदिति” निषादस्थपतिर्यजतेत्यर्थः। तत्रायं सन्देहः किमत्र षष्ठीसमासः निषादस्य स्थपतिर्निषादस्थपतिरिति निषादश्चासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा। तत्र यदि षष्ठीसमासः तदा यो द्विजातिरेव विद्वान्निषादानामाधिपत्यं करोति तस्यात्राधिकारः यदि च कर्मधारयः तदा निषाद एव यः स्थपतिस्तस्यात्राधिकार इति। तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्त्वादग्निमत्त्वाच्चात्राधिकारो युज्यते अन्यजातीयस्य निषादस्याविद्वत्त्वेनानग्निमत्त्वेन चासमर्थत्वात्, तस्मात् षष्ठीसमास एवायमिति पूर्वपक्षः। सिद्धान्तस्तु कर्मधारयोऽयम् निषादश्चायं स्थपतिश्चेति कुतः? षष्ठीसमासपक्षे निषादपदे लक्षणाप्रसक्तेः न ह्यत्र षष्ठी श्रूयते यतः सम्बन्धः प्रतीयेत। अतो निषादपदेनैव षष्ठ्यर्थो लक्षणीयः इतरस्मिंस्तु पक्षे द्वयोरपि पदयोः स्वार्थतैव न लक्षणा तस्मान्निषाद एव स्थपतिरत्राधिकारी श्रुतिबलात् अविद्वाननग्निमानपीति सिद्धम्। अपि चात्र निषादरूप्यं दक्षिणा श्रूयेत कूटं दक्षिणा काणो वा गर्दभ इति कूटं हि निषादानामेवोपकारकम् नार्य्याणामिति” कर्क०। वृहस्पतिसवकर्त्तरि तु “स्थपतिरित्येनं ब्रूयुः” कात्या० श्रौ० २२।५।२८ सू०। “सराजानो ब्राह्मणा यं पुरस्कुर्वीरन् एतेन यजेत” “वृहस्पतिसवेन” सू०। राज्ञा सहिता ब्राह्मणा यं ब्राह्मणं धर्मस्थापकत्वेन चाङ्गीकुर्वीरन् “एतेन स एतेन यजेत वृहस्पतिसवेन” सं०व्या०। वृहस्पतिसवकर्त्तृवत् द्विगोसवकर्त्तर्य्यपि यथोक्तं “स्थपतिरित्येनं ब्रूयुः” कात्या० श्रौ० २२।११।११सू०।“गोसवयाजिनं जनाः”। राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् (मुख्यत्वेनाङ्गीकुर्वीरन्” स गोसवेन यजेत २२।११।८कर्क० “कारुभेदस्य लक्षणं यथा “वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रम। दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः”।

**स्थपुट** त्रि० तिष्ठति स्था–क स्थं पुटं यत्र। १विषमोन्नतप्रदेशे हेमच०। “स्थपुटगतमपि क्रव्यमव्यग्रमत्तीति” मालतीमा०। २विषमस्थाने-सञ्चारिणि-जीवे पु० त्रिका०।

**स्थल** स्थाने भ्वा० पर० अक० सेट् ज्वला०। स्थलति अस्थालीत्। ष्ठलधातुनैवायं गतार्थ इत्यन्ये।

**स्थल** न०स्त्री०स्थल–अच्। जलशून्ये अकृत्रिमे भूभागे अमरः स्त्रीत्वपक्षे ङीप्। “वनस्थलीर्मर्मरपत्त्रमोक्षाः” कुमारः। २कृत्रिमाकृत्रिमप्रदेशमात्रे ३कृत्रिमभूभागे तु न०।

**स्थलकन्द** पु०स्थलजः कन्दः। (वनओल) अपास्यकन्दे रत्नमा०

**स्थलकमल** न० स्थलजात कमलम्। स्थलपद्मे भावप्र०।

**स्थलकुमुद** पु० स्थले कुमुदमस्यस्य सादृश्येन अच्। करवीरे राजनि०।

**स्थलपद्म** न० स्थलजातं पद्मं शाक०। स्वनामख्याते पुष्पप्रधानवृक्षे त्रि० स्थलजं पद्ममिव। २मानके पु० रत्नमा०

**स्थलपद्मिनी** स्त्री स्थलपद्मानां समूहः तेषां सन्निकृष्टदेशो वा इनि ङीप्। १स्थलपद्मसमूहे २तद्युक्तदेशे च। “ददर्श दूनः स्थलपद्मिनीं नलः” नैष०।

**स्थलमञ्जरी** स्त्री स्थलस्य मञ्जरीव। अपामार्गे रत्नमा०।

**स्थलशृङ्गाट** पु० स्थलजातः शृङ्गाटः शाक०।१गोक्षुरे रत्नमा० तस्य कण्टकावृतत्वात् तथात्वम्।